शार्दूलविक्रीडितेनाह छित्वार्कमिति । अर्कमादित्यं हित्वा त्यक्त्वा यदाऽन्यः कश्चिद्‌ग्रहो भौमादिकः शीतांशोश्चन्द्रात् स्वान्त्योभयस्थो भवति द्वितीयस्थो, द्वादशस्थो, वा द्वितीयद्वादशस्थौ वा द्वौ भवतस्तदा सुनफाऽनफादुरुधुराख्यं योगत्रयं भवति एतदुक्तं भवति अर्कं हित्वा यदाऽन्योग्रहः कश्चिच्चन्द्रात् द्वितीयस्थाने भवति तदा सुनफानामयोगो भवति अथार्कं वर्जयित्वा चन्द्रात् द्वादशगो भवति कश्चित्तदा अनफानामयोगो भवति एवं चन्द्रात् द्वितीयद्वादशगौ ग्रहौ भवतस्तदा दुरुधुरानाम योगो भवति योगत्रयेऽप्यादित्यो यदि द्वितीये द्वादशे वा स्थाने भवति तदा योगभङ्गकृद्भवति । किन्तु योगकर्त्तॄणां मध्ये न गण्यते । एते योगाः बहुभिराचार्यैः कथिताः अन्यथा तु बहुभिः केमद्रुमः उक्तः । अथास्य योगत्रयस्याभावे बहुभिरार्यैः केमद्रुमाख्योयोगोऽभिहितः एतदुक्तं भवति चन्द्राच्च द्वितीये न द्वादशे कश्चिद्‌ग्रहो भवति तदा केमद्रुमाख्योयोगो भवति अन्यैस्त्वसाविति अन्येषां गर्गादीनामेवं मतं केन्द्रे जन्मलग्नकेन्द्रे शीतकरे चन्द्रे वा भौमादिग्रहयुते भौमादिग्रहविरहितयोरपि चन्द्राद्‌द्वितीयद्वादशस्थानयोः केमद्रुमो न भवति केन्द्रे ग्रहयुते इत्यत्र कैश्चिच्चन्द्रकेन्द्रमेव केवलं व्याख्यातम् तच्चायुक्तम् चन्द्रकेन्द्रे ग्रहयुते चन्द्रमसोऽपि योगोऽन्तर्भवति शीतकरे ग्रहयुत इत्येतदपार्थकं स्यात् अत्र च भगवान् गार्गिः “व्ययार्थकेन्द्रगश्चन्द्राद्विना भानुं न चेद्‌ग्रहः । कश्चित् स्यात् वा विना चन्द्रलग्नात् केन्द्रगतोऽथ वा । योगः केमद्रुमो नाम तदा स्याद्यत्र गर्हिताः । भवन्ति निन्दिताचारा दारिद्र्यापत्तिसंयुताः” तथा च सारावल्याम् “सुनफानफादुरुधुराः क्रमेण योगा भवन्ति रविरहितैः । वित्तान्त्योभयसंस्थैः कैरववनबान्धवाद्विहगैः” एतेन “यदा योगाः केन्द्रे ग्रहवर्जितः शशाङ्कश्च । केमद्रुमोऽतिकष्टः शशिनि च सर्वग्रहादृष्टे” । अन्ये आचार्या नेच्छन्ति वराहमिहिरस्तु पुनरिच्छत्येव अस्मिन्नर्थे तस्यैव तद्वाक्यम् अन्यथा केमद्रुम इति एवमुक्त्वा परमतमुक्तम् अन्यैरसौ इति “केन्द्रे शीतकरेऽथवा ग्रहयुते केमद्रुमो नेष्यते” स्वल्पजातकेऽपि । तेन सुनफानफादुरुधुराऽभावे केमद्रुमउक्तः तथा च “रविवर्जं द्वादशगैरनफा चन्द्रद्वितीयगैः सुनफा । उभयस्थितैर्दुरुधुरा केमद्रुमसंज्ञकोऽतोऽन्यः” । सत्यस्यापि सुनफानफादुरुधुराभावे केमद्रुमः तथा च “सुनफा त्वनफायोगोदौरुधुरश्चन्द्रसंस्थितत्वात् । प्राक् पृष्ठतो ग्रहेन्द्रैरुभयगतैस्तेषु रविवर्जम् । केमद्रुमोऽत्र योगोऽन्यथा भवेद्यत्र गर्हितं जन्म” केचित् केन्द्रनवांशकेष्विति केचिदाचार्याः केन्द्रेषु केचिच्च नवांशकेष्वेतद्योगत्रयं वदन्ति यथा चन्द्राद्‌द्वितीयद्वादशोभयस्थैः ग्रहैः सुनफाद्या योगाव्याख्याताः तथा कैश्चिच्छ्रुतकीर्तिजीवशर्मप्रभृतिभिः केन्द्रवशान्नवांशकवशाच्च व्याख्याताः एतदुक्तं भवति ताराग्रहैश्चन्द्राच्चतुर्थस्थानस्थैः सुनफा दशमस्थानस्थैरनफा चतुर्थदशमस्थितैः दुरुधुरा अतोऽन्यथा केमद्रुमः तथा च श्रुतकीर्तिः “चन्द्राच्चतुर्थैः सुनफा दशमस्थितैः कीर्तितोऽनफा विहगैः । उभयस्थितैर्दुरुधुरा केमद्रुमसंज्ञितोऽन्यथा योगः” केचिन्नवांशकेषु वदन्ति यत्र तत्र राशौ यद्राशिसम्बन्धिनवांशके चन्द्रमा भवति तस्माद्राशेः यो द्वितीयो राशिः तत्र यदि ताराग्रहोभवति तदा सुनफा अथ चन्द्रनवांशकराशेर्द्वादशे ताराग्रहो भवति तदाऽनफा अथ चन्द्रनवांशकराशेः द्वितीये द्वादशे च यदा ग्रहौ भवतस्तदा दुरुधुरा अतोऽन्यथा केमद्रुमः । तथा च चन्द्रनवांशकराशितोद्विद्वादशराशी यदि ग्रहरहितौ भवतः तदा केमद्रुमः तथा च जीवशर्मा “यद्राशिसंस्थे शीतांशुर्नवांशे जन्मनि स्थितः । तद्‌द्वितीयस्थितैर्योगः सुनफाख्यः प्रकीर्तितः । द्वादशैरनफा ज्ञेया ग्रहैर्द्विद्वादशस्थितैः । प्रोक्तो दुरुधुरा योगोऽन्यथा केमद्रुमः स्मृतः” । उक्तिः प्रसिद्धा न या येषामेवंविधं मतं तेषामुक्तिः लोके न प्रसिद्धा तन्मतं वृद्धज्योतिषिकैः नाङ्गीकृतमित्यर्थः । अथ सुनफानफादुरुधुराख्यप्रकारज्ञानमिन्द्रवज्रयाह त्रिंशत्सरूपा इति सरूपाः सैकाः त्रिंशदेकत्रिंशत् सुनफाख्यायोगाः तावन्त एवानफाख्याः षष्टित्रयमशीत्यधिकं शतं दुरुधुराप्रभेदानाम एषां पूर्ववद्विकल्पगणितम् । इच्छाविकल्पैरित्यादि । एतच्छ्लोके लोष्टुकप्रस्तारः पूर्वमेव नाभसयोगाध्याये व्याख्यातः इच्छाविकल्पैः क्रमशः परिपाट्याऽन्यत्र लोष्टुकमभिनीय नीते निवृत्तिः कार्या पुनः भूयोऽन्यनीतिरित्यन्यत्र स्थानान्तरे चालनम् । अथ सुनफादयो भौमबुधगुरुसितासितैः पञ्चभिर्निष्पाद्यन्ते तस्मादिच्छाविकल्पाः पञ्च तेषां न्यासः अत्र प्राग्वत् पूर्वेण पूर्वेण गणितेन युक्तस्थानं विनान्त्यं प्रवर्दन्ति संख्यामिति कृत्वा जातम्

५ ४ ३ २ १ अथवा प्राग्वत् सैव संख्या जाता । एवम्

१ २ ३ ४ ५ मेकविकल्पाः पञ्च, द्विविकल्पा दश, त्रिवि-